**Series : EFGH/S** **SET~4**

प्रश्न-पत्र कोड
Q.P. Code **52/S**

रोल नं.
Roll No.

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।
Candidates must write the Q.P. Code on the title page of the answer-book.

| नोट | NOTE |
|---|---|
| (I) कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं। | (I) Please check that this question paper contains **15** printed pages. |
| (II) प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें। | (II) Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate. |
| (III) कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं। | (III) Please check that this question paper contains **18** questions. |
| (IV) **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में यथा स्थान पर प्रश्न का क्रमांक अवश्य लिखें।** | (IV) **Please write down the Serial Number of the question in the answer-book at the given place before attempting it.** |
| (V) इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। 10.15 बजे से 10.30 बजे तक परीक्षार्थी केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे। # | (V) 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the candidates will read the question paper only and will not write any answer on the answer-book during this period. |

# संस्कृतम्
# SANSKRIT

*अवधि : होरात्रयम्*
*निर्धारित समय : **3** घण्टे*
*Time allowed : **3** hours*

*पूर्णाङ्काः : **80***
*अधिकतम अंक : **80***
*Maximum Marks : **80***

**General Instructions :**

*This question paper is divided into **4** (Four) sections.*

*It has total **18** questions.*

***Section A** – 1 Question no. 1*

***Section B** – 3 Questions no. 2 to 4*

***Section C** – 7 Questions no. 5 to 11*

***Section D** – 7 Questions no. 12 to 18*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

**सामान्य-निर्देशा:**

*अस्मिन् प्रश्नपत्रे **चत्वार:** खण्डा: सन्ति ।*

*अस्मिन् प्रश्नपत्रे अष्टादश **(18)** प्रश्ना: सन्ति ।*

***खण्ड: 'क'** – 1 – प्रश्नसंख्या 1*

***खण्ड: 'ख'** – 3 – प्रश्नसंख्या 2 – 4*

***खण्ड: 'ग'** – 7 – प्रश्नसंख्या 5 – 11*

***खण्ड: 'घ'** – 7 – प्रश्नसंख्या 12 – 18*

*विशिष्टनिर्देशानुसारं प्रश्ना: समाधेया: ।*

*उत्तरपुस्तिकायां लेखनात् पूर्वं सर्वप्रथमं प्रश्नसंख्या लेखनीया ।*

## खण्ड: 'क' *10 अङ्का:*

## अपठितावबोधनम्

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – *10*

'शरीरम् आद्यं खलु धर्मसाधनम्' अर्थात् अस्माकं शरीरम् एव अस्माकं सर्वेषां कर्तव्यानां प्रमुखं साधनम् अस्ति । अतः वयं सर्वदा शरीरेण स्वस्थाः भवेम यतः स्वस्थशरीरे एव स्वस्थ-मस्तिष्कस्य निवासः भवति । स्वास्थ्य-रक्षणाय योगः अति लाभकरः इति सर्वे जानन्ति एव । योगासनैः शरीरस्य सम्यग् व्यायामो जायते । योगासनेन सह प्राणायामस्य अपि सम्बन्धो वर्तते । सम्यग् व्यायामेन रुधिरस्य सम्यक् सञ्चारो जायते तेन च सर्वाणि इन्द्रियाणि स्वस्थाने तिष्ठन्ति । एतेन एव कार्येषु अपि कुशलता जायते । योगेन बुद्धिः तीव्रा भवति शारीरिकस्थूलता चापि न्यूना भवति । शरीरं दृढं पुष्टं च भवति । वस्तुतः 'योगः कर्मसु कौशलम्' इति श्रीमद्भगवद्गीतायाः उक्तिः एतदेव सङ्केतयति ।

(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) *2×1=2*

(i) अस्माकं सर्वेषां कर्तव्यानां प्रमुखं साधनं किम् अस्ति ?

(ii) स्वास्थ्य-रक्षणाय किम् अति लाभकरः ?

(iii) योगासनेन सह कस्य अपि सम्बन्धो वर्तते ?

(आ) पूर्णवाक्येन लिखत – (केवलं प्रश्नद्वयम्) *2×2=4*

(i) सर्वे किं जानन्ति ?

(ii) वयं किमर्थं सर्वदा शरीरेण स्वस्थाः भवेम ?

(iii) सम्यग् व्यायामेन कस्य सम्यक् सञ्चारो जायते कानि च स्वस्थाने तिष्ठन्ति ?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। *1*

(ई) यथानिर्देशम् उत्तरत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) 'भवेम' इति क्रियापदस्य कर्तृपदं किं भवेत् ?

(A) आसनानाम् (B) योगः

(C) व्यायामः (D) वयम्

(ii) 'सर्वाणि' इति विशेषणपदस्य विशेष्यपदं किम् ?

(A) इन्द्रियाणि (B) आसनानि

(C) चक्षुः (D) योगः

(iii) 'योगासनेन सह प्राणायामस्य अपि सम्बन्धो वर्तते' अत्र किं क्रियापदम् ?

(A) सह (B) वर्तते

(C) अपि (D) योगः

(iv) 'गात्रम्' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(A) शरीरम् (B) मस्तिष्कम्

(C) व्यायामः (D) स्कन्धद्वयम्

**खण्डः 'ख'** *15 अङ्काः*

**रचनात्मकं कार्यम्**

**2.** नन्दिनी मोदीनगरे वसति । तस्याः भगिनी अनन्या मुंबईनगरे निवसति । नन्दिन्याः विद्यालये पर्यावरण-विषये एका गोष्ठी जाता । गोष्ठीं वर्णयन्ती सा अनन्यायै एकं पत्रम् लिखति । मञ्जूषातः समुचितपदानि चित्वा पत्रं पुनः लिखन्तु। $10\times\frac{1}{2}=5$

221, शिवपुरी,
मोदीनगरम्

(i) ____________ भगिनि !

नमस्ते।

गतसप्ताहे मम (ii) ____________ एका महत्त्वपूर्णा गोष्ठी अभवत् । तत्र (iii) ____________ वर्धमानं प्रदूषणं दृष्ट्वा पर्यावरणस्य (iv) ____________ उपायानां विषये चर्चा अभवत् यत् मार्गेषु इतस्ततः (v) ____________ न क्षेपणीयः । (vi) ____________ समये-समये शुद्धिः करणीया । मार्गेषु, उद्यानेषु विद्यालयेषु च अधिकाधिकं (vii) ________ आरोपणीयाः। ध्वनिप्रदूषणं निवारयितुं ध्वनिप्रसारणयन्त्राणां (viii) ____________ प्रयोगः करणीयः । अस्मिन् विषये स्वविचारान् लिखित्वा प्रेषयतु भवती। गृहे सर्वेभ्यः मम (ix) ____________ निवेदनीयाः।

भवत्याः अनुजा

(x) ____________

**मञ्जूषा**

| |
|---|
| विद्यालये, प्रणामाः, नगरेषु, नदीजलस्य, नन्दिनी, न्यूनतमः, अवकरः, वृक्षाः, रक्षणाय, प्रिये। |

**3.** प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत। *5×1=5*



**मञ्जूषा**

| |
|---|
| वातावरणम्, आश्रमस्य, मुनिः, पशवः, वृक्षस्य, शोभनम्, लिखति, सूर्योदयः, आकाशे, नदी, मृगः, दृश्यते, नीचैः, कुटीरः, हरीतिमा। |

**अथवा**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –

**'प्रातःभ्रमणम्'**

**मञ्जूषा**

| |
|---|
| उपवनम्, वृक्षाः, जनाः, पवनः, प्रतिदिनम्, शीतलः, स्वास्थ्याय, आवश्यकम्, सूर्योदयः, आनन्दम्, ऊर्जा, अनुभवन्ति, स्फूर्तिः । |

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत – (केवलं वाक्यपञ्चकम्) *5×1=5*

(i) मैंने एक कथा पढ़ी।

I read a story.

(ii) बन्दर इधर-उधर भाग रहे हैं।

The monkeys are running here and there.

(iii) आपका कार्य उत्तम है।

Your work is the best.

(iv) हे मित्र ! सदा सत्य बोलो।

Friend ! Always speak the truth.

(v) हम सब गीत गाएँगे।

We will sing a song.

(vi) तुम्हें नियमों का पालन करना चाहिए।

You should follow the rules.

(vii) गंगा का जल पवित्र होता है।

The water of Ganga is pure.

**खण्डः 'ग'** ***25 अङ्काः***

**अनुप्रयुक्तव्याकरणम्**

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) आचारः प्रथमः + धर्मः इत्येतद् विदुषां वचः।

(ii) कश्चन चौरः गृहाभ्यान्तरं प्रविष्टः।

(iii) कः इदं दुष्करं कुर्यात् + इदानीं शिविना विना ?

(iv) जगत्पतेः सृष्टिरेषा रमणीया।

(v) यदि न स्यान्नरपतिः।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत – (केवलं प्रश्नचतुष्टयम् ) *4×1=4*

(i) व्याघ्रमारी इयम् इति मत्वा व्याघ्रो भयाकुलचित्त: नष्ट: ।

(A) भयात् आकुल: चित्त:

(B) भयात् आकुलं चित्तम्

(C) भयेन आकुल: चित्त:

(D) भयेन आकुलं चित्तं यस्य स:

(ii) किं द्वयोरप्येकमेव प्रतिवचनम् ।

(A) वचनं वचने प्रति

(B) वचनं वचनम् इति

(C) वचने वचनम् इति

(D) वचनेन वचनेन इति

(iii) तत: प्रविशत: विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ ।

(A) कुश: च लव: च

(B) लव: च कुश: च

(C) लवयो: च कुशयो: च

(D) कुशस्य च लवस्य च

(iv) पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि ।

(A) पुत्रदैन्यम्

(B) पुत्रदैन्य:

(C) दीनपुत्र:

(D) पुत्रदीनताम्

(v) मलेन सह धरातलम् ।

(A) समल:

(B) मलसहितम्

(C) समलम्

(D) समले

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) हरिततरूणां ललितलतानां माला <u>रमणीया</u> ।

(A) रमणीय + आ

(B) रमणीया + आ

(C) रमणीय + टाप्

(D) रमणी + इन्

(ii) सितम्बरमासे मम अर्ध-<u>वर्ष + ठक्</u> परीक्षा भविष्यति ।

(A) वार्षिक: (B) वार्षिकी

(C) वार्षिक्य: (D) वार्षिकम्

(iii) हिमकरस्य <u>शीतल + त्व</u> लोके प्रसिद्धम् अस्ति ।

(A) शीतलत्व (B) शीतलत्वम्

(C) शीतलता (D) शीतलत्वाम्

(iv) सा <u>तपस्विनी</u> मत्कृतेनापराधेन स्वापत्यम् एवं निर्भर्त्सयति ।

(A) तपस्विन् + ङीप्

(B) तपस्विनी + इन

(C) तपस्वी + णिनि

(D) तपस्विन् + ठक्

(v) युद्धे <u>बल + मतुप्</u> जन: एव विजयं लभते ।

(A) बलमती (B) बलवान्

(C) बलवती (D) बलवत्य:

**8.** वाच्यानुसारम् उचितपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) ऋद्धि: ____________ खादति ।

(A) आम्रफलम् (B) आम्रफलस्य

(C) आम्रफलेन (D) आम्रफलेषु

(ii) ____________ पत्रं न लिख्यते।

(A) ते (B) तया

(C) तम् (D) तस्यै

(iii) तस्याः माता ओदनं ____________।

(A) पचति (B) पच्यन्ते

(C) पच्यते (D) पचन्ति

(iv) त्वया ____________ क्रियते ?

(A) किम् (B) कानि

(C) का (D) कस्य

**9.** कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) संस्कृतदिवसे प्रातः ____________ 9:00 वादने सरस्वती-वन्दना अभवत्।

(ii) तदा ____________ 9:15 वादने एका छात्रा भाषायाः महत्त्वम् अवदत्।

(iii) तदन्तरम् __________ 9:30 वादने एका समूहनृत्यप्रस्तुतिः अभवत्।

(iv) ____________ 9:45 वादने मम कक्षायाः छात्राः एकां नाटिकां प्रस्तुतवन्तः/प्रस्तुतवत्यः।

(v) अन्ते ____________ 10:00 वादने शान्तिपाठः अभवत्।

**10.** मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) व्याघ्रोऽपि ____________ नष्टः गलबद्धशृगालकः।

(ii) यत्रास्ते सा धूर्ता ____________ गम्यताम्।

(iii) सः दीनः इति जानन् ____________ कृषकः तं बहुधा पीडयति।

(iv) यदा मेघाः गर्जन्ति ____________ वर्षा भवति।

**मञ्जूषा**

| |
|---|
| तत्र, अपि, तदा, सहसा। |

**11.** अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुन: लिखत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) छात्रा: पाठं <u>पठति</u>।

(A) पठथ

(B) पठसि

(C) पठन्ति

(D) पठथ:

(ii) करण्डके अनेकानि <u>आम्रम्</u> सन्ति।

(A) आम्रे

(B) आम्राणि

(C) आम्रस्य

(D) आम्रेषु

(iii) सा तत्र <u>सखी</u> प्रति गच्छति।

(A) सखीम्

(B) सखिषु

(C) सखीनाम्

(D) सख्याम्

(iv) रोहित: श्व: मम गृहम् <u>आगच्छत्</u>।

(A) आगमिष्यति

(B) आगच्छति

(C) गच्छतु

(D) गमिष्यति

खण्ड: 'घ'

## पठितावबोधनम्

*30 अङ्का:*

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – *5*

अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान् । न्यायाधीशो बंकिमचन्द्र: उभाभ्यां पृथक्-पृथक् विवरणं श्रुतवान् । सर्वं वृत्तमवगत्य स: तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम् । किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत् । ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान् । अन्येद्यु: तौ न्यायालये स्व-स्व-पक्षं पुन: स्थापितवन्तौ । तदैव कश्चिद् तत्रत्य: कर्मचारी समागत्य न्यवेदयत् यत् इत: क्रोशद्वयान्तराले कश्चिज्जन: केनापि हत: । तस्य मृतशरीरं राजमार्गम् निकषा वर्तते । आदिश्यतां किं करणीयमिति । न्यायाधीश: आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान् ।

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) न्यायाधीशस्य नाम किम् ?

(ख) न्यायाधीश: तं कीदृशम् अमन्यत ?

(ग) तौ कुत्र स्व-स्व-पक्षं स्थापितवन्तौ ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) न्यायाधीश: किम् आदिष्टवान् ?

(ख) कर्मचारी किं न्यवेदयत् ?

(ग) न्यायाधीश: किमर्थं निर्णेतुं नाशक्नोत् ?

(iii) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'न्यवेदयत्' इति क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम् ?

(ख) 'अग्रिमे' इति विशेषणपदस्य विशेष्यपदं किम् ?

(ग) 'रात्रौ' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

**13.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – *5*

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बल: ।
पिको वसन्तस्य गुणं न वायस:,
करी च सिंहस्य बलं न मूषक: ॥

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) कीदृश: जन: गुणं जानाति ?

(ख) कीदृश: जन: गुणं न जानाति ?

(ग) सिंहस्य बलं को जानाति ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) पिक: किं जानाति वायस: च किं न जानाति ?

(ख) करी कस्य बलं जानाति ?

(ग) क: बलस्य गुणं जानाति क: च न जानाति ?

(iii) भाषिककार्यम् – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) श्लोके 'जानाति' इति पदस्य पर्यायपदं किम् प्रयुक्तम् ?

(ख) 'गुणी गुणं वेत्ति' अत्र कर्तृपदं किम् ?

(ग) 'निर्बलः' इति पदस्य विपर्ययपदं किम् अत्र प्रयुक्तम् ?

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – *5*

*राम:* – (स्वगतम्) धिङ् मामेवंभूतम् । सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भर्त्सयति ।

(सवाष्पमवलोकयति)

*राम:* – अतिदीर्घ: प्रवासोऽयं दारुणश्च । (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि । न युक्तं च स्त्रीगतमनुयोक्तुम्, विशेषतस्तपोवने । तत् कोऽत्राभ्युपाय: ?

*विदूषक:* – (जनान्तिकम्) अहं पुन: पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी ?

*लव:* – तस्या: द्वे नामनी।

*विदूषक:* – कथमिव ?

*लव:* – तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।

*राम:* – अपि च इतस्तावद् वयस्य ! मुहूर्त्तमात्रम्।

*विदूषक:* – (उपसृत्य) आज्ञापयतु भवान्।

*राम:* – अपि कुमारयोरनयोरस्माकं च सर्वथा समरूप: कुटुम्बवृत्तान्त: ?

(नेपथ्ये)

इयती वेला सञ्जाता रामायणगानस्य नियोग: किमर्थं न विधीयते ?

*उभौ* – राजन् ! उपाध्यायदूतोऽस्मान् त्वरयति।

*राम:* – मयापि सम्माननीय एव मुनिनियोग:।

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) अतिदीर्घ: क: आसीत् ?

(ख) कुशलवयो: मातरं के 'देवी' इति नाम्ना आह्वयन्ति ?

(ग) भगवान् वाल्मीकि: सीतां किमुक्त्वा आह्वयति ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) उभौ किं वदत: ?

(ख) श्रीरामस्य कुमारयो: च क: सर्वथा समरूप: आसीत् ?

(ग) क: तयो: जनन्या: नाम पृच्छति ?

(iii) भाषिककार्यम् – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'माता' इत्यर्थे किं पदम् अत्र प्रयुक्तम् ?

(ख) 'भवान्' इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम् ?

(ग) 'इयती वेला' अनयो: पदयो: विशेषणपदं किम् ?

**15.** अधोलिखित-रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) पतङ्गाः अम्बरपथम् आपेदिरे ।

(ii) धेनूनां माता सुरभिः आसीत् ।

(iii) त्वं मानुषात् विभेषि ।

(iv) प्रस्तरतले लतातरुगुल्माः पिष्टाः न भवन्तु ।

(v) मयूरस्य नृत्यं प्रकृतेः आराधना ।

**16.** मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत – *4×1=4*

दुष्कराण्यपि कर्माणि मतिवैभवशालिनः ।
नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते ॥

**अन्वयः –**

मतिवैभवशालिनः (जनाः) (i) __________ युक्तिं (च) (ii) __________ दुष्कराणि (iii) _________ कर्माणि (iv) _________ एव प्रकुर्वते ।

**मञ्जूषा**

| लीलया, नीतिम्, अपि, समालम्ब्य । |
|---|

**अथवा**

अधोलिखितश्लोकस्य भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत –

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥

**भावार्थः –**

अस्य भावोऽस्ति यत् (i) _________ वर्णः कृष्णः वर्तते पिकस्य अपि वर्णः (ii) _________ एव अस्ति । अतः तयोः पिके काके च कः भेदः अस्ति ? अर्थात् वर्णदृष्ट्या तयोः कश्चिद् भेदो न दृश्यते । परन्तु यदा (iii) ____________ समयः आगच्छति तदा तयोः स्वरैः ज्ञायते यत् कः (iv) ___________ अस्ति कश्च पिको वर्तते ।

**मञ्जूषा**

| वसन्तस्य, काकस्य, काकः, कृष्णः । |
|---|

**17.** अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुन: लिखत – $8\times\frac{1}{2}=4$

(i) एक: कृषक: आसीत्।

(ii) कृषक: तं दुर्बलं वृषभं तोदनेन अवर्तत।

(iii) तस्य समीपे द्वौ बलीवर्दौ आस्ताम्।

(iv) कृषीवल: क्रुद्ध: अभवत्।

(v) स: जवेन गन्तुम् अशक्त: च आसीत्।

(vi) तमुत्थापयितुम् बहुवारं यत्नमकरोत् तथापि स: नोत्थित:।

(vii) स: ऋषभ: हलमूढ्वा गन्तुम् अशक्त: क्षेत्रे पपात।

(viii) तयो: बलीवर्दयो: एक: शरीरेण दुर्बल: आसीत्।

**18.** अधोलिखितवाक्येषु रेखाङ्किकतपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत – (केवलं प्रश्नत्रयम्) $3\times1=3$

(i) कथा चेयं श्लाघ्या सरसिरुहनाभस्य नियतम्।

(A) उन्नता (B) अलौकिकी

(C) प्रशंसनीया (D) निन्दनीया

(ii) अहं शीतले जले अविचल: स्थितप्रज्ञ: इव तिष्ठामि।

(A) प्रज्ञा (B) योगी

(C) भोगी (D) रोगी

(iii) कृषकस्य गृहे द्वौ बलीवर्दौ आस्ताम्।

(A) वृषभौ (B) अश्वौ

(C) अजौ (D) खगौ

(iv) अन्येषां वदने ये तु ते चक्षुनामनी मते।

(A) मस्तके (B) दशने

(C) हृदये (D) मुखे

| Marking Scheme<br>Strictly Confidential<br>(For Internal and Restricted use only)<br>SECONDARY SCHOOL SUPPLEMENTARY EXAMINATION, 2025<br>SUBJECT NAME : SANSKRIT (SUB. CODE-122) | |
|---|---|
| **General Instructions: -** | |
| **1.** | You are aware that evaluation is the most important process in the actual and correct assessment of the candidates. A small mistake in evaluation may lead to serious problems which may affect the future of the candidates, education system and teaching profession. To avoid mistakes, it is requested that before starting evaluation, you must read and understand the spot evaluation guidelines carefully. |
| **2.** | **"Evaluation policy is a confidential policy as it is related to the confidentiality of the examinations conducted, evaluation done and several other aspects. Its leakage to public in any manner could lead to derailment of the examination system and affect the life and future of millions of candidates. Sharing this policy/document to anyone, publishing in any magazine and printing in Newspaper/Website etc. may invite action under various rules of the Board and IPC."** |
| **3.** | Evaluation is to be done as per instructions provided in the Marking Scheme. It should not be done according to one's own interpretation or any other consideration. Marking Scheme should be strictly adhered to and religiously followed. **However, while evaluating, answers which are based on latest information or knowledge and/or are innovative, they may be assessed for their correctness otherwise and due marks be awarded to them. In class-X, while evaluating two competency-based questions, please try to understand given answer and even if reply is not from marking scheme but correct competency is enumerated by the candidate, due marks should be awarded.** |
| **4.** | The Marking Scheme carries only suggested value points for the answers<br>These are in the nature of Guidelines only and do not constitute the complete answer. The students can have their own expression and if the expression is correct, the due marks should be awarded accordingly. |
| **5.** | The Head-Examiner must go through the first five answer books evaluated by each evaluator on the first day, to ensure that evaluation has been carried out as per the instructions given in the Marking Scheme. If there is any variation, the same should be zero after delibration and discussion. The remaining answer books meant for evaluation shall be given only after ensuring that there is no significant variation in the marking of individual evaluators. |
| **6.** | Evaluators will mark( √ ) wherever answer is correct. For wrong answer CROSS 'X' be marked. Evaluators will not put right (✓) while evaluating which gives an impression that answer is correct and no marks are awarded. **This is most common mistake which evaluators are committing.** |
| **7.** | If a question has parts, please award marks on the right-hand side for each part. Marks awarded for different parts of the question should then be totaled up and written in the left-hand margin and encircled. This may be followed strictly. |

| | |
|---|---|
| **8.** | If a question does not have any parts, marks must be awarded in the left-hand margin and encircled. This may also be followed strictly. |
| **9.** | If a student has attempted an extra question, answer of the question deserving more marks should be retained and the other answer scored out with a note **"Extra Question"**. |
| **10.** | No marks to be deducted for the cumulative effect of an error. It should be penalized only once. |
| **11.** | A full scale of marks __________(example 0 to 80/70/60/50/40/30 marks as given in Question Paper) has to be used. Please do not hesitate to award full marks if the answer deserves it. |
| **12.** | Every examiner has to necessarily do evaluation work for full working hours i.e., 8 hours every day and evaluate 20 answer books per day in main subjects and 25 answer books per day in other subjects (Details are given in Spot Guidelines).This is in view of the reduced syllabus and number of questions in question paper. |
| **13.** | Ensure that you do not make the following common types of errors committed by the Examiner in the past:-<br>● Leaving answer or part thereof unassessed in an answer book.<br>● Giving more marks for an answer than assigned to it.<br>● Wrong totaling of marks awarded on an answer.<br>● Wrong transfer of marks from the inside pages of the answer book to the title page.<br>● Wrong question wise totaling on the title page.<br>● Wrong totaling of marks of the two columns on the title page.<br>● Wrong grand total.<br>● Marks in words and figures not tallying/not same.<br>● Wrong transfer of marks from the answer book to online award list.<br>● Answers marked as correct, but marks not awarded. (Ensure that the right tick mark is correctly and clearly indicated. It should merely be a line. Same is with the X for incorrect answer.)<br>● Half or a part of answer marked correct and the rest as wrong, but no marks awarded. |
| **14.** | While evaluating the answer books if the answer is found to be totally incorrect, it should be marked as cross (X) and awarded zero (0) Marks. |
| **15.** | Any unassessed portion, non-carrying over of marks to the title page, or totaling error detected by the candidate shall damage the prestige of all the personnel engaged in the evaluation work as also of the Board. Hence, in order to uphold the prestige of all concerned, it is again reiterated that the instructions be followed meticulously and judiciously. |
| **16.** | The Examiners should acquaint themselves with the guidelines given in the "**Guidelines for Spot Evaluation**" before starting the actual evaluation. |
| **17.** | Every Examiner shall also ensure that all the answers are evaluated, marks carried over to the title page, correctly totaled and written in figures and words. |
| **18.** | The candidates are entitled to obtain photocopy of the Answer Book on request on payment of the prescribed processing fee. All Examiners/Additional Head Examiners/Head Examiners are once again reminded that they must ensure that evaluation is carried out strictly as per value points for each answer as given in the Marking Scheme. |

# Set 4

# MARKING SCHEME
# SANSKRIT (SUB. CODE-122)

**‘क’ खण्ड : (अपठितावबोधनम्)** **(10 अङ्काः)**

1. अधोलिखितं गद्यांश पठित्वा प्रदत्तप्रश्नानाम् उत्तराणिं संस्कृतेन लिखत –

(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) **$1 \times 2 = 2$**

(i) शरीरम्

(ii) योगः

(iii) प्राणायामस्य

(आ) पूर्णवाक्येन लिखत – (केवलं प्रश्नद्वयम्) **$2 \times 2 = 4$**

(i) स्वास्थ्य-रक्षणाय योगः अति लाभकरः इति सर्वे जानन्ति ।

(ii) वयं सर्वदा शरीरेण स्वस्थाः भवेम यतः स्वस्थे शरीरे एव स्वस्थ-मस्तिष्कस्य निवासः भवति ।

(iii) सम्यग् व्यायामेन रुधिरस्य सम्यक् सञ्चारो जायते तेन च सर्वाणि इन्द्रियाणि स्वस्थाने तिष्ठन्ति ।

(इ) योगः अथवा अन्यः कोऽपि उपयुक्तः शीर्षकः । **$1 \times 1 = 1$**

(ई) यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्) **$1 \times 3 = 3$**

(i) (घ) वयम्

(ii) (क) इन्द्रियाणि

(iii) (ख) वर्तते

(iv) (क) शरीरम्

**‘ख’ खण्डः (रचनात्मकं कार्यम्)** **15 अङ्काः**

2. पत्रलेखनम् – **$1 \times 5 = 5$**

(i) प्रिये

(ii) विद्यालये

(iii) नगरेषु

(iv) रक्षणाय

(v) अवकरः

(vi) नदीजलस्य

(vii) वृक्षाः

(viii) न्यूनतमः

(ix) प्रणामाः

(x) नन्दिनी

3. छात्राः स्वेच्छया पञ्च वाक्यानि रचयिष्यन्ति । **1 × 5 = 5**

4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत । (केवलं वाक्यपञ्चकम्) **1 × 5 = 5**

1. अहम् एकां कथाम् अपठम् ।
2. वानराः इतस्ततः धावन्ति ।
3. भवतः कार्यम् उत्तमम् अस्ति ।
4. हे मित्र ! सर्वदा सत्यं वद ।
5. वयं गीतं गास्यामः / वयं गीतानि गास्यामः ।
6. त्वं नियमानां पालनं कुर्याः / त्वं नियमान् पालयेः ।
7. गङ्गायाः जलं पवित्रं भवति ।

## 'ग' खण्डः (अनुप्रयुक्तव्याकरणम्)

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत – (केवलं प्रश्नचतुष्टयम्) **1 × 4 = 4**

(i) प्रथमो धर्मः

(ii) कः + चन

(iii) कुर्यादिदानीं

(iv) सृष्टिः + एषा

(v) स्यात् + नरपतिः

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्) **1 × 4 = 4**

(i) (घ) भयेन आकुलं चित्तं यस्य सः ।

(ii) (ख) वचनं वचनम् इति ।

(iii) (क) कुशः च लवः च

(iv) (क) पुत्रदैन्यम्

(v) (ग) समलम्

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्) **1 × 4 = 4**

(i) (ग) रमणीय + टाप्

(ii) (ख) वार्षिकी

(iii) (ख) शीतलत्वम्

(iv) (क) तपस्विन् + ङीप्

(v) (ख) बलवान्

8. वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत – (केवलं प्रश्नत्रयम्) **1 × 3 = 3**

(i) (क) आम्रफलम्

(ii) (ख) तया

(iii) (क) पचति

(iv) (क) किम्

9. कालबोधकशब्दैः अधोलिखित – दिनचर्यां पूरयत – (केवलं प्रश्नचतुष्टयम्) **1 × 4 = 4**

(i) नववादने

(ii) सपाद नववादने

(iii) सार्ध नववादने

(iv) पादोन दशवादने

(v) दशवादने

10. मञ्जूषायां प्रदतैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत – (केवलम् प्रश्नत्रयम्) **1 × 3 = 3**

(i) सहसा

(ii) तत्र

(iii) अपि

(iv) तदा

11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत – (केवलं प्रश्नत्रयम्) **1 × 3 = 3**

(i) (ग) पठन्ति

(ii) (ख) आम्राणि

(iii) (क) सखीम्

(iv) (क) आगमिष्यति

## ‘घ’ खण्डः (पठितावबोधनम्)

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – **5**

(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)

(क) बंकिमचन्द्रः

(ख) निर्दोषम्

(ग) न्यायालये

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)

(क) न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान् ।

(ख) कर्मचारी न्यवेदयत् यत् इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः, तस्य मृतशरीरं राजमार्गं निकषा वर्तते ।

(ग) न्यायाधीशः प्रमाणाभावात् निर्णेतुं नाशक्नोत् ।

(इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)

(क) कर्मचारी

(ख) दिने

(ग) दिने

13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – **5**

(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)

(क) गुणी

(ख) निर्गुणः

(ग) करी

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)

(क) पिकः वसन्तस्य गुणं जानाति वायसः च वसन्तस्य गुणं न जानाति ।

(ख) करी सिंहस्य बलं जानाति ।

(ग) बली बलस्य गुणं जानाति निर्बलः च बलस्य गुणं न जानाति ।

(इ) भाषिककार्यम् - (केवलं प्रश्नद्वयम्)

(क) वेत्ति

(ख) गुणी

(ग) बली

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - **5**

(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)

(क) प्रवासः

(ख) तपोवासिनः

(ग) वधूः

(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)

(क) उभौ-राजन् ! उपाध्यायदूतोऽस्मान् त्वरयति ।

(ख) श्रीरामस्य कुमारयोः च कुटुम्बवृत्तान्तः सर्वथा समरूपः आसीत् ।

(ग) विदूषकः तेषां जनन्याः नाम पृच्छति ।

(इ) भाषिककार्यम् - (केवलं प्रश्नद्वयम्)

(क) जननी

(ख) आज्ञापयतु

(ग) इयती

15. रेखाङ्कित – पदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं प्रश्नचतुष्टयम्) **1 × 4 = 4**

(क) के

(ख) कासाम्

(ग) कस्मात्

(घ) के

(ङ) कस्याः

16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित – श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत **1 × 4 = 4**

अन्वयः - (i) नीतिम्

(ii) समालम्ब्य

(iii) अपि

(iv) लीलया

**अथवा**

अधोलिखितश्लोकस्य भावार्थ मञ्जूषातः उचितपदानि चित्वा पूरयत

(i) काकस्य

(ii) कृष्णः

(iii) वसन्तस्य

(iv) काकः

17. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत - **1 × 4 = 4**

(i) एकः कृषकः आसीत् ।

(ii) तस्य समीपे द्वौ बलीवर्दौ आस्ताम् ।

(iii) तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः आसीत् ।

(iv) कृषकः तं दुर्बल वृषभं तोदनेन अवर्तत ।

(v) सः जवेन गन्तुम् अशक्तः च आसीत् ।

(vi) सः ऋषभः हलमूढ्वा गन्तुम् अशक्तः क्षेत्रे पपात ।

(vii) तमुत्थापयितुम् बहुवारं यत्नमकरोत् तथापि सः नोत्थितः ।

(viii) कृषीवलः क्रुद्धः अभवत् ।

18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत – (केवलं प्रश्नत्रयम्) **1 × 3 = 3**

(i) (ग) प्रशंसनीया

(ii) (ख) योगी

(iii) (क) वृषभौ

(iv) (घ) मुखे

---